# Matangi Stotram by Umasahacharya

# ઉમાસહાચાર્યવિરચિતં માતઙ્ગી સ્તોત્રમ્

## Document Information

Text title : mAtangIstotram 4

File name : mAtangIstotram4.itx

Category : devii, dashamahAvidyA, devI

Location : doc_devii

Author : umAsahAchArya

Proofread by : Aruna Narayanan

Latest update : July 5, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2020

*sanskritdocuments.org*

Matangi Stotram by Umasahacharya

# ઉમાસહાચાર્યવિરચિતં માતઙ્ગી સ્તોત્રમ્

॥ ૐ ક્લીં માતઙ્ગ્યૈ નમઃ ॥

માતઙ્ગી નવયાવકાર્દ્રચરણાં પ્રોલ્લાસિકૃષ્ણાંશુકાં
વીણોલ્લાસિકરાં સમુન્નતકુચાં મુક્તાપ્રવાલાવલીમ્ ।
હૃદ્યાઙ્ગીં સિતશઙ્ખકુણ્ડલધરાં બિમ્બાધરાં સુસ્મિતાં
આકીર્ણાલકવેણિમબ્જનયનાં ધ્યાયેત્ શુક-શ્યામલામ્ ॥ ૧॥

કલાધીશોત્તંસાં કરકલિતવીણાહિતરસાં
કલિન્દાપત્યાભાં કલિતહૃદયારક્તવસનામ્ ।
પુરાણીં કલ્યાણીં પુરમથનપુણ્યોદયકલાં
અધીરાક્ષીમેનામવટુતટસન્નદ્ધકબરીમ્ ॥ ૨॥

કરોદઞ્ચદ્વીણં કનકદલતાટઙ્કનિહિતં
સ્તનાભ્યામાનમ્રં તરુણમિહિરારક્તવસનમ્ ।
મહઃ કલ્યાણં તન્મધુમદભરાતામ્રનયનં
તમાલશ્યામં નઃ સ્તબકયતુ સૌખ્યાનિ સતતમ્ ॥ ૩॥

કરાઞ્ચિતવિપઞ્ચિકાં કલિતચન્દ્રચૂડામણિં
કપોલવિલસન્મહઃકનકપત્રતાટઙ્કિનીમ્ ।
તપઃકલમધીશિતસ્તરુણભાનુરક્તામ્બરાં
તમાલદલમેચકાં તરલલોચનામાશ્રયે ॥ ૪॥

કસ્તૂરીરચિતાભિરામતિલકા કલ્યાણતાટઙ્કિની
બાલા શીતમયૂખશોણવસના પ્રાલમ્બિધમ્મિલ્લકા ।
હારોદઞ્ચિતપીવરસ્તનતટા હાલામદોલ્લાસિની
શ્યામા કાઞ્ચન કામિની વિજયતે ચઞ્ચદ્વિપઞ્ચીકરા ॥ ૫॥

માતા મરકતશ્યામા, માતઙ્ગી મૃદુભાષિણી ।
કટાક્ષયે તુ કલ્યાણી કદમ્બવનવાસિની ॥ ૬॥

શૃઙ્ગે સુમેરોઃ સહચારિણીભિર્ગીયન્તિ માતઙ્ગિ તવાવદાનમ્ ।
આમોદિનીમાગલમાપિબન્તઃ કાદમ્બરીમમ્બરવાસિનસ્તે ॥ ૭॥

એકેન ચાપમપરેણ કરેણ બાણા-
    નન્યેન પાશમિતરેણ શૃણિં દધાના ।
આનન્દકન્દલિતવિદ્રુમબાલવલ્લી
    સંવિન્મયી સ્ફુરતુ કાઞ્ચન દેવતા મે ॥ ૮॥

ગજદાનકલઙ્કિકણ્ઠમૂલા
    કબરીવેષ્ટનકાઙ્ક્ષણીયગુઞ્જા ।
કુરુતાદ્ દુરિતાદ્ વિમોક્ષણં મે
    કુહુના ભિલ્લકુટુમ્બિની ભવાની ॥ ૯॥

પાણૌ મૃણાલસગુણં દધતીક્ષુચાપં
    પૃષ્ઠે લસત્કનકકેતકબાણકોશૌ ।
અઙ્ગે પ્રવાલકવચં વનવાસિની સા
    પઞ્ચાનનં મૃગયતે કદલીવનાન્તે ॥ ૧૦॥

વામે વિસ્તૃતિશાલિનિ સ્તનતટે વિન્યસ્ય વીણામુખં
    તન્ત્રીં તારવિરાવિણીમસકલૈરાસ્ફાલયન્તી નખૈઃ ।
અર્દ્ધોન્મીલદપાઙ્ગદિક્ષુવલિતગ્રીવં મુખં બિભ્રતી
    માયા કાઞ્ચન મોહિની વિજયતે માતઙ્ગકન્યામયી ॥ ૧૧॥

પ્રતિક્ષણપયોધર-પ્રવિલસદ્વિપઞ્ચીગુણ-
    પ્રસારિ કરપઙ્કજં બલભિદશ્મપુઞ્જોપમમ્ ।
કદમ્બવનમાલિકાશશિકલાસમુદ્ભાસિતં
    મતઙ્ગકુલમણ્ડનં મનસિ મે મહો જૃમ્ભતામ્ ॥ ૧૨॥

લાક્ષાલોહિતપાદપઙ્કજદલામાપીનતુઙ્ગસ્તનીં
    કર્પૂરોજ્જ્વલચારુશઙ્ખવલયાં કાશ્મીરપત્રાઙ્કુરામ્ ।
તન્ત્રીતાડનપાટલાઙ્ગુલિદલાં અન્દામહ્ માતરં
    માતઙ્ગીં મદમન્થરાં મરકતશ્યામાં મનોહારિણીમ્ ॥ ૧૩॥

સ્રસ્તં કેશરદામભિર્વલયિતં ધમ્મિલ્લમાબિભ્રતી
    તાલીપત્રપુટાન્તરૈઃ સુઘટિતૈસ્તાટઙ્કિની મૌક્તિકૈઃ ।
મૂલે કલ્પતરોર્મદસ્ખલિતદૃગ્ દૃષ્ટ્યૈવ સમ્મોહિની
    કાચિદ્ ગાયનદેવતા વિજયતે વીણાવતી વાસના ॥ ૧૪॥

યત્ ષટ્પત્રં કમલમુદિતં તસ્ય યત્કર્ણિકાન્ત-
    ર્જ્યોતિસ્તસ્યાપ્યુદરકુહરે યત્તદોઙ્કારપીઠમ્ ।
તસ્યાપ્યન્તઃ સ્તનભરનતાં કુણ્ડલીતિ પ્રસિદ્ધાં
    શ્યામાકારાં સકલજનનીં સન્તતં ભાવયામિ ॥ ૧૫॥

નિશિ નિશિ બલિમસ્યૈ ભુક્તશેષેણ દત્ત્વા
    મનુ મનુ ગણનાથો મન્ત્રજાપં વિતન્વન્ ।
ભવતિ નૃપતિપૂજ્યો યોષિતાં પ્રીતિપાત્રં
    વ્રજતિ ચ પુનરન્તે શાશ્વતીં મૂર્તિમાદ્યામ્ ॥ ૧૬॥

કાસારન્તિ પયોધયો વિષધરાઃ કર્પૂરહારન્તિ ચ
    શ્રીખણ્ડન્તિ દવાનલા વનગજાઃ સારઙ્ગશાવન્તિ ચ ।
દાસન્ત્યદ્ભુતશાત્રવાઃ કિમપરં પુષ્યન્તિ વજ્રાણ્યપિ
    શ્રીદામોદરસોદરે ભગવતિ ! ત્વત્પાદનિષ્ઠાત્મનામ્ ॥ ૧૭॥

કુવલયનિભા કૌશેયાર્દ્ધોરુકા મુકુટોજ્જ્વલા
    હલમુશલિની સદ્ભક્તેભ્યો વરાભયદાયિની ।
કપિલનયના મધ્યેક્ષામા કઠોરઘનસ્તની
    જયતિ જગતાં માતઃ ! સા તે વરાહમુખી તનુઃ ॥ ૧૮॥

અમૃતમહોદધિમધ્યે રત્નદ્વીપે સકલ્પવૃક્ષવને ।
નવમણિમણ્ડપમધ્યે મણિમયસિંહાસનસ્યોર્દ્ધ્વમ્ ॥ ૧૯॥

માતઙ્ગીં ભૂષિતાઙ્ગીં મધુમદમુદિતાં ઘૂર્ણમાણાક્ષિયુગ્માં
    સ્વિદ્યદ્વક્ત્રાં કદમ્બપ્રસવપરિલસદ્વેણિકામાત્તવીણામ્ ।
બિમ્બોષ્ઠીં રક્તવસ્ત્રાં મૃગમદતિલકામિન્દુલેખાવતંસાં
    કર્ણોદ્યચ્છઙ્ખપત્રાં કઠિનકુચભરાક્રાન્તકાન્તાવલગ્નામ્ ॥ ૨૦॥

ઉન્મીલદ્યૌવનાઢ્યાં નિબિડમદભરોદ્વેગલીલાવકાશાં
    રત્નગ્રૈવેયહારાઙ્ગદકટકકટીસૂત્રમઞ્જીરભૂષામ્ ।
આનીયાર્થાનભીષ્ટાન્ સ્મિતમધુરદૃશા સાધકં તર્પયન્તીં
    ધ્યાયેદ્ દેવીં શુકાભાં શુકમખિલકલારૂપમસ્યાશ્ચ પાર્શ્વે ॥ ૨૧॥

અમૃતોદધિમધ્યેઽત્ર રત્નદ્વીપે મનોરમે ।
કદમ્બબિલ્વનિલયે કલ્પવૃક્ષોપશોભિતે ॥ ૨૨॥

તસ્ય મધ્યે સુખાસ્તીર્ણે રત્નસિંહાસને શુભે ।
ત્રિકોણકર્ણિકામધ્યે તદ્બહિઃ પઞ્ચપત્રકમ્ ॥ ૨૩॥

અષ્ટપત્રં મહાપદ્મં કેસરાઢ્યં સકર્ણિકમ્ ।
તત્પાર્શ્વેઽષ્ટદલં પ્રોક્તં ચતુઃપત્રં પુનઃ પ્રિયે ॥ ૨૪॥

ચતુરસ્રં ચ તદ્બાહ્યે એવં દેવ્યાસનં ભવેત્ ।
તસ્ય મધ્યે સુખાસીનાં શ્યામવર્ણાં શુચિસ્મિતામ્ ॥ ૨૫॥

કદમ્બમાલાપરિતઃ પ્રાન્તબદ્ધશિરોરુહામ્ ।
પ્રાલમ્બાલકસંયુક્તાં ચન્દ્રલેખાવતંસકામ્ ॥ ૨૬॥

લલાટતિલકોપેતાં ઈષત્પ્રહસિતાનનામ્ ।
કિઞ્ચિત્સ્વેદામ્બુરચિતલલાટફલકોજ્જ્વલામ્ ॥ ૨૭॥

ત્રિવલીતરઙ્ગમધ્યસ્થરોમરાજિવિરાજિતામ્ ।
સર્વાલઙ્કારસંયુક્તાં સર્વાભરણભૂષણામ્ ॥ ૨૮॥

નૂપુરૈ રત્નખચિતૈઃ કટિસૂત્રૈરલઙ્કૃતામ્ ।
વલયૈ રત્નરચિતૈઃ કેયૂરૈર્મણિભૂષણૈઃ ॥ ૨૯॥

ભૂષિતાં દ્વિભુજાં બાલાં મદાઘૂર્ણિતલોચનામ્ ।
વાદયન્તીં સદા વીણાં શઙ્ખકુણ્ડલભૂષણામ્ ॥ ૩૦॥

પ્રાલમ્બિકર્ણાભરણાં કર્ણોત્તંસવિરાજિતામ્ ।
યૌવનોન્માદિનીં વીરાં રક્તાંશુકપરિગ્રહામ્ ॥ ૩૧॥

તમાલનીલાં તરુણીં મદમત્તાં મતઙ્ગિનીમ્ ।
ચતુઃષષ્ટિકલારૂપાં પાર્શ્વસ્થશુકસારિકામ્ ॥ ૩૨॥

માતઙ્ગેશીં મહાદેવીં નિઃશ્વસ્યૈનાન્તરાત્મના ।
સૂર્યકોટિપ્રતીકાશાં જપાકુસુમસન્નિભામ્ ॥ ૩૩॥

અથવા પીતવર્ણાં ચ શ્યામામેવાપરાં શ્રયે ।
નિષ્પાપસ્ય મનુષ્યસ્ય કિં ન સિદ્ધ્યતિ ભૂતલે ॥ ૩૪॥

કામવચ્ચરતે ભૂમૌ સાક્ષાદ્ વૈશ્રવણાયતે ।
ગદ્યપદ્યમયી વાણી તસ્ય વક્ત્રાદ્ વિનિર્ગતા ॥ ૩૫॥

ભૈરવી ત્રિપુરા લક્ષ્મીર્વાણી માતઙ્ગિનીતિ ચ ।
પર્યાયવાચકા હ્યેતે સત્યમેતદ્ બ્રવીમિ તે ॥ ૩૬॥

ત્રિક-પઞ્ચકાષ્ટયુગલં ષોડશકોષ્ઠાષ્ટકં ચતુઃષષ્ટૌ ।
ધ્યાત્વાઽઙ્ગદેવતાનાં દેવ્યાઃ પરિતો યજેત ભાવેન ॥ ૩૭॥

માતઙ્ગિ ! માતરીશે ! મધુમથનારાધિતે ! મહામાયે ! ।
મોહિનિ ! મોહપ્રમથિનિ ! મન્મથમથનપ્રિયે નમસ્તેઽસ્તુ ॥ ૩૮॥

સ્તુતિષુ તવ દેવિ ! વિધિરપિ વિહિતમતિર્ભવતિ ચાપ્યવિહિતમતિઃ ।
યદ્યપિ ભક્તિર્મામપિ ભવતીં સ્તોતું વિલોભયતિ ॥ ૩૯॥

યતિજનહૃદયાવાસે ! વાસવવન્દ્યે વરાઙ્ગિ માતઙ્ગિ ! ।
વીણાવાદ્યવિનોદૈર્નારદગીતે ! નમો દેવિ ! ॥ ૪૦॥

દેવિ ! પ્રસીદ સુન્દરિ પીનસ્તનિ કમ્બુકણ્ઠિ ઘનકેશિ! ।
શ્યામાઙ્ગિ વિદ્રુમોષ્ઠિ સ્મિતમુખિ મુગ્ધાક્ષિ મૌક્તિકાભરણે! ॥ ૪૧॥

ભરણે ત્રિવિષ્ટપસ્ય પ્રભવસિ તત એવ ભૈરવી ત્વમસિ ।
ત્વદ્ભક્તિલબ્ધવિભવો ભવતિ ક્ષુદ્રોઽપિ ભુવનપતિઃ ॥ ૪૨॥

પતિતઃ કૃપણો મૂકોઽપ્યમ્બ! ભવત્યાઃ પ્રસાદલેશેન ।
પૂજ્યઃ સુભગો વાગ્મી ભવતિ જડશ્ચાપિ સર્વજ્ઞઃ ॥ ૪૩॥

જ્ઞાનાત્મકે જગન્મયિ નિરઞ્જને નિત્યશુદ્ધપદે! ।
નિર્વાણરૂપિણિ પરે ત્રિપુરે! શરણં પ્રપન્નસ્ત્વામ્ ॥ ૪૪॥

ત્વાં મનસિ ક્ષણમપિ યો ધ્યાયતિ મુક્તાવૃતાં શ્યામામ્ ।
તસ્ય જગત્ત્રિતયેઽસ્મિન્ કાસ્તા યા ન સ્ત્રિયઃ સાધ્યાઃ ॥ ૪૫॥

સાધ્યાક્ષરગર્ભિતપઞ્ચનવત્યક્ષરાત્મિકે જગન્માતઃ! ।
ભગવતિ માતઙ્ગેશ્વરિ ! નમોઽસ્તુ તુભ્યં મહાદેવિ ! ॥ ૪૬॥

વિદ્યાધરસુરકિન્નરગુહ્યકગન્ધર્વસિદ્ધયક્ષવરૈઃ ।
આરાધિતે ! નમસ્તેઽસ્તુ પ્રસીદ કૃપયૈવ માતઙ્ગિ! ॥ ૪૭॥

માતઙ્ગીસ્તુતિરિયમન્વહં પ્રજપ્તા
  જન્તૂનાં વિતરતિ કૌશલં ક્રિયાસુ ।
વાગ્મિત્વં શ્રિયમધિકાં ચ માનશક્તિં
  સૌભાગ્યં નૃપતિભિરર્ચનીયતાં સ યાતિ ॥ ૪૮॥

માતઙ્ગીમનુદિનમેવમર્ચયન્તઃ

શ્રીમન્તઃ સુભગતરાઃ કવિત્વભાજઃ ।
પ્રાપ્યાન્તે સકલસમીહિતાર્થવર્ગં
દેહાન્તે વિમલતરં વિશન્તિ ધામ ॥ ૪૯॥

અવટુતટઘટિતચોલીં તાડિતતાડીં પલાશતાટઙ્કામ્ ।
વીણાવાદનવેલાકમ્પિતશિરસં નમામિ માતઙ્ગીમ્ ॥ ૫૦॥

વીણાવાદનનિરતં તદલાબુસ્થગિતવામકૃતકુચમ્ ।
શ્યામલકોમલગાત્રં પાટલનયનં પરં ભજે ધામ ॥ ૫૧॥

અઙ્કિતપાણિચતુષ્ટયમઙ્કુશપાશેક્ષુપુષ્પચાપશરૈઃ ।
શઙ્કરજીવિતમિત્રં પઙ્કજનયનં પરં ભજે ધામ ॥ ૫૨॥

કરકલિતકનકવીણાલાબુકકદલીકૃતૈકકુચકમલા ।
જયતિ જગદેકમાતા માતઙ્ગી મઙ્ગલાયતના ॥ ૫૩॥

અઙ્ગલાલિતમનઙ્ગવિદ્વિષસ્તુઙ્ગપીનકુચભારભઙ્ગુરમ્ ।
શ્યામલં શશિનિભાનનં ભજે કોમલં કુટિલકુન્તલં મહઃ ॥ ૫૪॥

વીણાવાદ્યવિનોદગીતનિરતાં લીલાશુકોલ્લાસિનીં
બિમ્બોષ્ઠીં નવયાવકાર્દ્રચરણામાકીર્ણકેશાલકામ્ ।
હૃદ્યાઙ્ગીં સિતશઙ્ખકુણ્ડલધરાલઙ્કારવેષોજ્વલાં
માતઙ્ગીં પ્રણતોઽસ્મિ સુસ્મિતમુખીં દેવીં શુકશ્યામલામ્ ॥ ૫૫॥

વેણીમૂલવિરાજિતેન્દુશકલાં વીણાનિનાદપ્રિયાં
ક્ષોણીપાલસુરેન્દ્રપન્નગગણૈરારાધિતાંહ્રિદ્વયામ્ ।
એણીચઞ્ચલલોચનાં સુવદનાં વાણીં પુરાણોજ્જ્વલાં
શ્રોણીભારભરાલસામનિમિષાં પશ્યામિ વિશ્વેશ્વરીમ્ ॥ ૫૬॥

કુચકલશનિષણ્ણકેલિવીણાં
કલમધુરધ્વનિકમ્પિતોત્તમાઙ્ગીમ્ ।
મરકતમણિભઙ્ગમેચકાભાં
મદનવિરોધિમનસ્વિનીમુપાસે ॥ ૫૭॥

તાડીદલોલ્લસિતકોમલકર્ણપાલીં
કેશાવલીકલિતદીર્ઘસુનીલવેણીમ્ ।
વક્ષોજપીઠનિહિતોજ્જ્વલનાદવીણાં
વાણીં નમામિ મદિરારુણનેત્રયુગ્મામ્ ॥ ૫૮॥

યામામનન્તિ મુનયઃ પ્રકૃતિં પુરાણીં
  વિદ્યેતિ યાં શ્રુતિરહસ્યવિદો ગૃણન્તિ ।
તામર્દ્ધપલ્લવિતશઙ્કરરૂપમુદ્રાં
  દેવીમનન્યશરણઃ શરણં પ્રપદ્યે ॥ ૫૯॥

યઃ સ્ફાટિકાક્ષવરપુસ્તકકુણ્ડિકાઢ્યાં
  વ્યાખ્યાસમુદ્યતકરાં શરદિન્દુશુભ્રામ્ ।
પદ્માસનાં ચ હૃદયે ભવતીમુપાસ્તે ।
  માતઃ! સ વિશ્વકવિતાર્કિકચક્રવર્તી ॥ ૬૦॥

બર્હાવતંસઘનબન્ધુરકેશપાશાં
  ગુઞ્જાવલીકૃતઘનસ્તનહારશોભામ્ ।
શ્યામાં પ્રવાલવસનાં શરચાપહસ્તાં
  તામેવ નૌમિ શબરીં શબરસ્ય નાથામ્ ॥ ૬૧॥

અજ્ઞાતસમ્ભવમનાકલિતાન્વવાયં
  ભિક્ષું કપાલિનમવાસસમદ્વિતીયમ્ ।
પૂર્વં કરગ્રહણમઙ્ગલતો ભવત્યાઃ
  શમ્ભુઃ ક એવ બુબુધે ગિરિરાજકન્યે ! ॥ ૬૨॥

ચર્મામ્બરં ચ શવભસ્મવિલેપનં ચ
  ભિક્ષાટનં ચ નટનં ચ પરેતભૂમૌ ।
વેતાલસંહતિપરિગ્રહતાં ચ શમ્ભોઃ
  શોભાં વહન્તિ ગિરિજે ! તવ સાહચર્યાત્ ॥ ૬૩॥

ગલે ગુઞ્જાબીજાવલિમપિ ચ કર્ણે શિખિશિખાં
  શિરો રઙ્ગે નૃત્યત્કનકકદલીમઞ્જુલદલમ્ ।
ધનુર્વામે ચાંસે શરમપરપાણૌ ચ દધતીં
  નિતમ્બે બર્હાલીં કુટિલકબરીં સિદ્ધશબરીમ્ ॥ ૬૪॥

લસદ્ગુઞ્જાપુઞ્જાભરણકિરણારક્તનયનાં
  જપાકર્ણાભૂષાં શિખિવરકલાપામ્બરવતીમ્ ।
નદજ્ઝિલ્લીપલ્લીવનતરુદલૈઃ સમ્પરિવૃતામ્ ।
  નમામિ વામોરું કુટિલકબરીં સિદ્ધશબરીમ્ ॥ ૬૫॥

અપર્ણાહોપર્ણાં સિરસકદલીસમ્ભવમલં
  ભવં જેતું પ્રૌઢિં કિલ મનસિ બાલા વિદધતી ।

નદજ્ઝિલ્લીપલ્લીવનતરુષુ હલ્લીસકરુચિ-
    ર્લસત્પલ્લીભિલ્લી કરકલિતભલ્લી વિજયતે ॥ ૬૬॥

ધનિનામવિનાભવન્મદાનાં ભવનદ્વારિ દુરાશયા શયાનામ્ ।
અવલોકય મામગેન્દ્રકન્યે! કરુણાકન્દલિતૈઃ કટાક્ષમોક્ષૈઃ ॥ ૬૭॥

કુવલયદલનીલં બર્બરસ્નિગ્ધકેશં
    પૃથુતરકુચભારાક્રાન્તકાન્તાવલગ્નમ્ ।
કિમિતિ બહુભિરુક્તૈસ્ત્વત્સ્વરૂપં પદં નઃ
    સકલજનનિ માતઃ ! સન્તતં સન્નિધત્તામ્ ॥ ૬૮॥

મિથઃ કેશાકેશિ પ્રધનનિધનાસ્તર્કઘટના
    બહુશ્રદ્ધાભક્તિપ્રણતિવિષયાશ્ચાપ્તવિધયઃ ।
પ્રસીદ પ્રત્યક્ષીભવ ગિરિસુતે! દેહિ શરણં
    નિરાલમ્બે ! ચેતઃ પરિલુઠતિ પારિપ્લવમિદમ્ ॥ ૬૯॥

લસદ્ગુઞ્જાહારસ્તનભરનમન્મધ્યલતિકા-
    મુદઞ્ચદ્ધર્મામ્ભઃકણગુણિતવક્ત્રામ્બુજરુચમ્ ।
શિવં પાર્થત્રાણપ્રણવમૃગયાકારકરણં
    શિવામન્વક્યાન્તીં શરણમહમન્વેમિ શબરીમ્ ॥ ૭૦॥

શિરસિ ધનુરટન્યા તાડ્યમાનસ્ય શમ્ભો-
    રલક-નયન-કોણે કિઞ્ચિદાલજ્યમાને ।
ઉપનિષદુપગીતં રુદ્રમુદ્ઘોષયન્તી
    પરિહરતિ મૃડાની મધ્યમં પાણ્ડવાનામ્ ॥ ૭૧॥

યદ્ગલાભરણતન્તુવૈભવાન્ નાયકો ગરલમાગલં પપૌ ।
તાં ચરાચરગુરોઃ કુટુમ્બિનીં નૌમિ યૌવનભરેણ લાલસામ્ ॥ ૭૨॥

સુધામપ્યાસ્વાદ્ય પ્રતિભયહરા મૃત્યુહરણીં
    વિપદ્યન્તે સર્વે વિધિ-શતમખાદ્યા દિવિષદઃ ।
કરાલં યત્ ક્ષ્વેડં કવલિતવતઃ કાલકલના
    ન શમ્ભોસ્તન્મૂલં જનનિ ! તવ તાટઙ્કમહિમા ॥ ૭૩॥

કરોપાન્તે કાન્તે વિતરણિનિશાન્તે વિદધતીં
    લસદ્વીણાશોણાં નખરુચિભિરેણાઙ્કવદનામ્ ।
સદા વન્દે સન્દેતરુરુહવશન્દેશકવશાત્

કૃપાલમ્બામમ્બાં કુસુમિતકદમ્બાઙ્ગણગૃહામ્ ॥ ૭૪॥

કર્ણલમ્બિતકદમ્બમઞ્જરીકેસરારુણકપોલમણ્ડલમ્ ।
કેવલં નિગમવાદગોચરં નીલિમાનમવલોકયામહે ॥ ૭૫॥

અકૃશં કુચયોઃ કૃશં વિલગ્ને વિપુલં ચક્ષુષિ વિસ્તૃતં નિતમ્બે ।
અરુણાધરમાવિરસ્તુ ચિત્તે કરુણાશાલિકપાલિભાગધેયમ્ ॥ ૭૬॥

અનભઙ્ગુરકેશપાશમમ્બ! પ્રભયા કીચકમેચકં વપુસ્તે ।
પરિતઃ પરિતો વિલોકયામઃ પ્રતિપચ્ચન્દ્રકલાધિરૂઢચૂડમ્ ॥ ૭૭॥

ધ્યાયેયં રત્નપીઠે શુકકલપઠિતં શ઼ૃણ્વતીં શ્યામગાત્રીં
ન્યસ્તૈકાઙ્ઘ્રીસરોજે શશિશકલધરાં વલ્લકીં વાદયન્તીમ્ ।
કહ્લારાબદ્ધભાલાં નિયમિતવિલસચ્ચૂલિકાં રક્તવસ્ત્રાં
માતઙ્ગીં શઙ્ખપત્રાં મધુમદવિવશાં ચિત્રકોદ્ભાસિભાલામ્ ॥ ૭૮॥

આરાધ્ય માતશ્ચરણામ્બુજં તે બ્રહ્માદયો વિશ્રુતકીર્તિમાપુઃ ।
અન્યે પરં વાગ્વિભવં મુનીન્દ્રાઃ પરાં શ્રિયં ભક્તિભરેણ ચાન્યે ॥ ૭૯॥

નમામિ દેવીં નવચન્દ્રમૌલિં માતઙ્ગિનીં ચન્દ્રકલાવતંસામ્ ।
આમ્નાયવાગ્ભિઃ પ્રતિપાદિતાર્થં પ્રબોધયન્તીં શુકમાદરેણ ॥ ૮૦॥

વિનમ્રદેવાસુરમૌલિરત્નૈર્નીરાજિતં તે ચરણારવિન્દમ્ ।
ભજન્તિ યે દેવિ ! મહીપતીનાં પરાં શ્રિયં ભક્તિમુપાશ્રયન્તિ ॥ ૮૧॥

માતઙ્ગિ! લીલાગમને ! ભવત્યાઃ સઞ્જાતમઞ્જીરમિષાદ્ ભજન્તે ।
માતસ્ત્વદીયં ચરણારવિન્દં અકૃત્રિમાણાં વચસાં વિગુમ્ફાઃ ॥ ૮૨॥

પદાત્પદં સિઞ્જિતનૂપુરાભ્યાં કૃતાર્થયન્તી પદવીં પદાભ્યામ્ ।
આસ્ફાલયન્તી કલવલ્લકીં તાં માતઙ્ગિની મે હૃદયં ધિનોતુ ॥ ૮૩॥

લીલાંશુકાબદ્ધનિતમ્બબિમ્બાં તાડીદલેનાર્પિતકર્ણભૂષામ્ ।
માધ્વીમદાઘૂર્ણિતનેત્રપદ્માં ઘનસ્તનીં શમ્ભુવધૂં સ્મરામિ ॥ ૮૪॥

તડિલ્લતાકાન્તમલબ્ધભૂષમ્, ચિરેણ લક્ષ્યં નવરોમરાજ્યા ।
સ્મરામિ ભક્ત્યા જગતામધીશિ ! વલિત્રયાઙ્કં તવ મધ્યમમ્બ! ॥ ૮૫॥

નીલોત્પલાનાં શ્રિયમાહરન્તીં કાન્ત્યાઃ કટાક્ષૈઃ કમલાકરાણામ્ ।
કદમ્બમાલાઞ્ચિતકેશપાશાં માતઙ્ગકન્યાં હૃદિ ભાવયામિ ॥ ૮૬॥

ધ્યાયેયમારક્તકપોલકાન્તં બિમ્બાધરં ન્યસ્તલલાટરમ્યમ્ ।

આલોલલીલાયિતમાયતાક્ષં મન્દસ્મિતં તે વદનં મહેશિ ! ॥ ૮૭॥

વામસ્તનાસઙ્ગસખીં વિપઞ્ચીં ઉદ્ઘાટયન્તીમરુણાઙ્ગુલીભિઃ ।
તદુત્થસૌભાગ્યવિલોલમૌલિં શ્યામાં ભજે યૌવનભારખિન્નામ્ ॥ ૮૮॥

સ્તુત્યાનયા શઙ્કર-ધર્મપત્નીં માતઙ્ગિનીં વાગધિદેવતાં તામ્ ।
સ્તુવન્તિ યે ભક્તિયુતા મનુષ્યાઃ પરાં શ્રિયં ભક્તિમુપાશ્રયન્તિ ॥ ૮૯॥

ગેહં નાકતિ ગર્વિતઃ પ્રણમતિ સ્ત્રીસઙ્ગમો મોક્ષતિ
મૃત્યુર્વૈદ્યતિ દૂષણં ચ ગુણતિ ક્ષ્માવલ્લભો દાસતિ ।
વજં પુષ્પતિ પન્નગોઽબ્જનલતિ હાલાહલં ભુજ્યતિ
દ્વેષી મિત્રતિ પાતકં સુકૃતતિ ત્વત્પાદસઞ્ચિન્તનાત્ ॥ ૯૦॥

એહ્યેહિ માતસ્ત્રિપુરે પવિત્રે ! યન્ત્રાન્તરે ત્વં વસતિં વિધેહિ ।
ગૃહ્ણસ્વ ગૃહ્ણસ્વ બલિં પ્રપૂજાં ત્રિકોણષટ્કોણદલેઽષ્ટકુણ્ડે ॥ ૯૧॥

એહ્યેહિ માતસ્ત્રિપુરે મદીયે નેત્રે નિવાસં કુરુ મઞ્જુનેત્રે ।
ભૂતાત્મકં વિશ્વમિદં નરસ્ય મે દર્શય ત્વં તવ ચિત્સ્વરૂપમ્ ॥ ૯૨॥

એહ્યેહિ માતસ્ત્રિપુરે મદીયે વક્ત્રે નિવાસં કુરુ ચન્દ્રવક્ત્રિ !।
પરાપવાદં વચનં નરસ્ય વાગીશ્વરં મે વદતાં કુરુષ્વ ॥ ૯૩॥

એહ્યેહિ માતસ્ત્રિપુરે મદીયે ચિત્તે નિવાસં કુરુ કલ્પવલ્લિ ! ।
વેગેન જાડ્યાદિ તમો નિરસ્ય વિધેહિ દીપ્તં તવ ચિત્સ્વરૂપમ્ ॥ ૯૪॥

અનેન સ્તોત્રપાઠેન સર્વપાપહરેણ વૈ ।
પ્રીયતાં પરમા શક્તિર્માતઙ્ગી સર્વકામદા ॥ ૯૫॥

ઇત્યાગમસારે ઉમાસહાચાર્યવિરચિતં શ્રીમાતઙ્ગીસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Aruna Narayanan

*Matangi Stotram by Umasahacharya*

pdf was typeset on July 5, 2020

Please send corrections to *sanskrit@cheerful.com*